# Rahu Kavacham

अस्य श्रीराहुकवचस्तोत्रमंत्रस्य चंद्रमा ऋषिः ।
अनुष्टुप छन्दः । रां बीजं पनमः शक्तिः ।

स्वाहा कीलकम्। राहुप्रीत्यर्थं जपे विनियोगः ।।
प्रणमामि सदा राहुं शूर्पाकारं किरीटिन् ।।

सैन्हिकेयं करालास्यं लोकानाम भयप्रदम् ।। ॉ।।
निलांबरः शिरः पातु ललाटं लोकवन्दितः।

चक्षुषी पातु मे राहुः श्रोत्रे त्वर्धशरीरवान् ।। १ ।।
नासिकां मे धूम्रवर्णः शूलपाणिर्मुखं मम।

जिव्हां मे सिंहिकासूनुः कंठं मे कठिनांघ्रीकः ।। २ ।।
भुजङ्गेशो भुजौ पातु निलमाल्याम्बरः करौ ।

पातु वक्षःस्थलं मंत्री पातु कुक्षिं विधुंतुदः ।।३ ।।
कटिं मे विकटः पातु ऊरु मे सुरपूजितः ।

स्वर्भानुर्जानुनी पातु जंघे मे पातु जाड्यहा ।।४ ।।
गुल्फौ ग्रहपतिः पातु पादौ मे भीषणाकृतिः ।

सर्वाणि अंगानि मे पातु निलश्चंदनभूषणरू ।।५ ।।
राहोरिदं कवचमृद्धिदवस्तुदं यो।

भक्त्या पठत्यनुदिनं नियतः शुचिः सन् ।
प्राप्नोति कीर्तिमतुलां श्रियमृद्धिमायु

रारोग्यमात्मविजयं च हि तत्प्रसादात् ।।६ ।।
।।इति श्रीमहाभारते धृतराष्ट्रसंजयसंवादे द्रोणपर्वणि राहुकवचं संपूर्णं ।